International Journal of Sanskrit Research 2021; 7(4): 279-281

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 279-281
© 2021 IJSR
www.anantaajournal.com
Received: 13-05-2021
Accepted: 26-06-2021

डॉ. सुमन्तकुमारदासः
(सहायकाचार्यः),
श्रीरमसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली-वहेडा, दरभंगा, बिहारम्, भारतम्

Corresponding Author:
डॉ. सुमन्तकुमारदासः
(सहायकाचार्यः),
श्रीरमसुन्दरसंस्कृतविश्वविद्याप्रतिष्ठानम्, रमौली-वहेडा, दरभंगा, बिहारम्, भारतम्

# ऋग्वेददृष्ट्या योगस्यावधारणा

**डॉ. सुमन्तकुमारदासः**

## प्रस्तावना

भारतवर्षमस्माकं मुनीनां ऋषीणां देशः। यस्य परम्परा संस्कृतिश्चाध्यात्मिकी यौगिकी च। न केवलं भारतवर्षस्य अपि तु समग्रविश्वस्य कृते योगस्यावदानमतीव महत्त्वपूर्णम्। विश्वशान्तिनिमित्तं योगस्य महती भूमिका वर्त्तत इति तु निर्विवादम्। भारतवर्षस्य स्तम्भद्वयं विद्येते संस्कृतं संस्कृतिश्च। एकस्य पतने अपरस्य ध्वंस इति निश्चप्रचम्। तथा चोक्तं-भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। विश्ववाङ्मयस्य सर्वप्राचीनग्रन्थो वेदः संस्कृतभाषायां विरचितः। स एव ऋग्वेदो विदन्त्येव विद्वद्धौरेयाः। वेदः सर्वविद्यामूलत्वात् सर्वजनादृतः शाश्वतः सनातनः। तत्र मन्त्रेषु योगस्योल्लेखो दृश्यते। तदेव प्रस्तुतं शोधनिबन्धे। ततः पूर्वं योगस्य स्वरूपमवश्यमवगन्तव्यमितिधियाधः प्रस्तूयते।

## योगशब्दस्यार्थ :-

व्याकरणदृष्ट्या युज् धातोः घञ् प्रत्ययेन योगशब्दो निष्पद्यते। पाणिनीयव्याकरणानुसारेण युज् धातुः त्रिषु गणेषु दृश्यते। दिवादिगणे युज् धातोः प्रयोगः समाध्यर्थे लभ्यते। युज् समाधौ। अस्य रूपाण्यात्मनेपद्यां प्रचलन्ति। ततः रुधादिगणे युजिर्-योगे धातुरवलोक्यते। अस्य रूपाणि परस्मैपद्यामात्मनेपद्याञ्च भवन्ति। पुनश्च चुरादिगणे युज् संयमने धातुः मिलति। अस्यु रूपाणि केवलं परस्मैपद्यां चलन्ति। एवं धातुत्रयेणोद्भवयोगशब्दस्यार्थः क्रमशः समाधिः, मिलनम्, संयमनञ्च॥ [1]

अमरकोषे यथा -

योगसंहननोपायध्यानसंगतियुक्तिषु। [2]

भगवता पतञ्जलिना योगशब्दस्यार्थो भवत्यनुशासनमिति विहितो योगसूत्रे-अथ योगानुशासनम् अर्थादनुशासनद्वारा चित्तस्य एकात्मभावः। परमात्मना सह जीवात्मनः मिलनम्। तदात्मसाक्षात्कार इत्युच्यते। ऋग्वेदानुसारं योगशब्दस्यार्थः भवति पुरुषार्थः।

## योगस्य स्वरूपम् -

योगशास्त्रे भगवता पतञ्जलिना प्रोक्तं यत्-योगश्चित्तवृतिनिरोधः। [3]

चित्तवृत्ति निरोधः योगः। का नाम वृत्तिरिति जिज्ञासायामिदमुच्यते-

वृत्तिसारूप्यम् इतरत्र। वृत्तय पञ्चतय्यः क्लिष्टा अक्लिष्टाः। ताः प्रमाणविपर्ययविकल्प-निद्रास्मृतिः। [4]

चित्तवृतित्तीनां निरोधः अभ्यासवैरागाभ्यां क्रियत इत्युक्तश्च तत्र-अभ्यासवैराग्याभ्यां तन्निरोधः। एवं तत्र योगः सविस्तरं वर्ण्यते। तत्रैव द्रष्टव्यः। वेदान्तदर्शनेजीवात्मापरमात्मनोः मिलनं योग इति स्वीक्रियते । एतदाधारीकृत्य याज्ञवल्क्यमुनिना योगस्य लक्षणमेवं कृतम्- संयोगो योग इत्युक्तो जीवात्मपरमात्मनोः ।

**गीतायां योग :-**

श्रीमद्भगवद्गीतैवैकं योगशास्त्रम् । तत्र भगवता श्रीकृष्णेनोक्तम् –

योगस्थ कुरु कर्माणि संगं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्यः समो भूत्वा समत्वं योग उच्यते ।। [5]

पुनश्च तत :– बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ।। [6]

**ऋग्वेदे योग :-**

वेदादिशास्त्राण्यस्मत्पूर्वजानां मुनीनां ऋषीणां योगसाधनायाः फलस्वरूपाणि भवन्ति । तत्र ब्रह्मविद्यामात्मसाद्विधातुं योगस्य महत्त्वपूर्णभूमिका वर्तत इति वृहदारण्यकोपनिषदो वाद्वाक्याज्ज्ञायते –

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

अत्र निदिध्यासनमात्मसाक्षात्कारस्य साधनम् । निदिध्यासनं ध्यानस्य नामान्तरम् । योगस्य अष्टौ अङ्गानि विद्यन्ते तेषु सप्तममङ्गं भवति ध्यानम् ।। ऋग्वेदस्य प्रथममण्डले योगशब्दस्योल्लेखो वर्त्तते । यथा –

स घा नो योग आभुवत्स राये स पुरन्ध्याम् ।
गमद् वाजेभिरा स नः।। [7]

अत्र सायणभाष्ये– स एव इन्द्रः विशिष्टगुणयुक्तः नः अस्माकं योगे-पूर्वमप्राप्तस्य पुरूषार्थस्य संवन्धे आभुवत् आभवतु पुरुषार्थं साधयत्वित्यर्थः। अत्र योगशब्दस्यार्थः पूर्वमप्राप्तस्य पुरुषार्थस्य सम्बन्धो विहितः सायणाचार्येण ।

यस्मादृते न सिद्ध्यति यज्ञो विपश्चितश्चन ।
सधीनां योगमिन्वति । [8]

अत्र सधीनां योगमिन्वति इत्यस्यार्थः सायणभाष्यानुसारेण-सोयं सदस्पतिर्देवो धीनामनुष्ठानविषयिणाम् अस्मद् बुद्धिनामानुष्ठेयकर्मणां वा योगं सम्बन्धं मिन्वति व्याप्नोति यजमानमनुगृह्य तदीयं यज्ञं निष्पादयत्वित्यर्थः। मनसा बुद्ध्या वानुष्ठितकर्मणः सम्बन्धः। तात्पर्यमेतद्यत् साधनाद्वारा मानसिकवृत्तीनाम् एकग्रता एकरूपता संतुलनम् वा भवति । एवमपरमन्त्रे-योगपदप्रयोगो द्रष्टव्यः-

योगे योगे तवस्तरं वाजे वाजे हवामहे ।
सखाय इन्द्र भूतये ।। [9]

सायणभाष्यानुसारेण योगे योगे प्रदेशे तत्तत्कर्मोपक्रमे इत्यादि । अत्र सायणाचार्यः योगे योगे इत्यस्यार्थः तत्तत्कर्मोपक्रमे प्रविष्टः। अर्थाद् विविधकर्मणां योगेन युद्धे वयं सखेव रक्षार्थम् इन्द्रम् आह्वायामः। इत्थमुपर्युक्तमन्त्रत्रयेषु प्रयुक्तं योगपदं चित्तस्य एकाग्रतामभिव्यनक्ति ।

**निष्कर्ष :-**

योगस्य बीजं ऋग्वेदीयमन्त्रेषु निहितमासीदित्युपर्युक्तालोच-नाज्ज्ञायते प्रतीयते वा । प्रथममन्त्रे योगपदं मोक्षप्रदपुरुषार्थः स्वीक्रियते । द्वितीये योगपदं चित्तवृतीनां साधना समाधिं प्रति संकेतयति । तृतीये युक्त्यर्थे योगपदस्य प्रयोगः दृश्यते। मन्ये तद्भावनामुररीकृत्य भगवता पतञ्जलिना योगसूत्रं प्रणीतम् । तत्र कथं मनुष्यो मुक्तिं प्राप्स्यतीति विषये सविस्तरं तेन प्रतिपाद्यते । मन्मते योगस्यार्थ एकात्मता । एकात्मतेत्युक्ते कामक्रोधलोभमोहमदमात्सर्यविवर्जितः आसक्तिं भेदभावञ्च परित्यज्य समभावापन्नः सन् कर्म करोति स एव योगी स एव समदर्शी पण्डितः। उक्तं च तत् भगवता श्रीकृष्णेन –

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।

अतः सर्वे समदर्शिनः भवन्त्विति वैदिकी प्रार्थना दरीदृश्यते-

समानि वः आकूतिः समाना हृदयानि वः।
समानमस्तु वो मनो यथा वा सुसहासति ।। [10]

यथा गीतायाम्-समं पश्यन् हि सर्वत्र समवस्थितमश्वरम् ।
न हि नस्त्यात्मनात्मानं ततो याति परां गतिम् ।। [11]

अतः समत्वं योग उच्यत इति साधीयान् ।

**सन्दर्भ :-**


1. (योग-ऋग्वेदीयपरिप्रेक्ष्य सेवा चोतना-जनवरी-जून 2019)
2. अ.को-३/३/२२।
3. यो.सू-१/२।

4. योे.सू-समाधिपादः।
5. गीता-२/४८।
6. गीता-२/५०।
7. ७ (ऋ.वे-१मण्डल/२अनुवाक्/५सूक्त/३मन्त्र।
8. ऋ.वे-१/५/१८/७।
9. ऋ.वे-१/६/३०/७।
10. ऋ.वे-१०/१९१/३।
11. ११-१३/२८।